# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2017**
**SECOND YEAR [BATCH 2016-19]**
**SANSKRIT [General]**

Date : 22/12/2017
Time : 11 am – 2 pm

**Paper : III**

Full Marks : 75

1. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×12]
   क) अनसूया-प्रियंवदा-चरित्रयोः तुलनात्मकम् आलोचतनं कुरुत। [12]
   ख) शकुन्तलां प्रति कः कथम् अभिशापं प्रदत्तवान्? नाटके तस्याभिशापस्य प्रदाने किं तात्पर्यं विद्यत इति विशद्यताम्। [4+8]
   ग) शाकुन्तले का हंसपदिका? कस्मिन्नङ्के सा प्राप्यते? तया किं गीतं गीतम्? तद्गानस्य नाटकीयं तात्पर्यं किमस्ति? [1+1+2+8]

2. **चत्वारः** प्रश्नाः समाधेयाः। [4×2]
   क) शाकुन्तले भरतवाक्ये केन नाम्ना कस्य देवस्य वन्दना कृता?
   ख) "आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः" – कः कं निगदितवान्?
   ग) शकुन्तलाया जननी का? कश्च जनकः?
   घ) अभिज्ञानशकुन्तलनाटके विदूषकस्य नाम किम्?
   ङ) कस्मिन् सरोवरे शकुन्तलाया अङ्गुरीयकं प्रनष्टम्?
   च) का सानुमती? कथं सा राजोद्यानमागतवती?
   छ) शकुन्तलया सह के दुष्यन्तराजधानीं गतवन्तः?

3. वङ्गभाषया पद्य**स्यैकस्या**नुवादः करणीयः। [1×6]
   क) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
   पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
   दर्भैरर्धावलीढैः शरविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
   पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमूर्व्यां प्रयाति।।
   ख) सरसिजमनुविद्धं शैवलेनापि रम्यं
   मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
   इयमधिकमनोज्ञा वल्कलेनापि तन्वी
   किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।
   ग) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
   पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
   तच्चेतसा स्मरति नूनमबोधपूर्वं
   भावस्थिराणि जननान्तरसौहृदानि।।

4. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×8]
   क) अर्थो हि कन्या परकीय एव
   तामद्य संप्रेष्य परिग्रहीतुः।
   जातो ममायं विशदः प्रकामं
   प्रत्यर्पितन्यास इवान्तरात्मा।।
   ख) सायन्तने सवनकर्मणि संप्रवृत्ते
   वेदिं हुताशनवतीं परितः प्रयस्ताः।

छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानाम्।

ग) उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु सम्पदः।।

5. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×6]

क) **एकस्य** सन्दर्भस्य भावार्थः परिष्करणीयः।

a) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

b) सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः।।

c) हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।

ख) विषयद्वयमवलम्ब्य टीका**द्वयं** लेख्यम्।
नान्दी, विदूषकः, गान्धर्वविवाहः, भरतवाक्यम्।

6. **एकः** प्रश्नः समाधेयः। [1×10]

क) राज्ञः समुत्पत्तिविषये मनोः मतमुपस्थापयत।

ख) व्यसनविषये मनोः मतं विवृणुत।

ग) सचिवे मनुमुनिमतमुपस्थापनीयम्।

7. वङ्गभाषया पद्य**स्यैकस्या**नुवादः कार्यः। [1×5]

क) यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।।

ख) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति।।

ग) ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्।।

8. **एकस्य** प्रश्नस्योत्तरं लेख्यम्।

क) पद्य**मेकं** सप्रसङ्गं व्याख्येयम्। [1×6]

a) कार्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः।।

b) एवंवृत्तस्य नृपतेः शिलोच्छेनापि जीवतः।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि।।

c) अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्ययौ।।

ख) विषय**द्वय**मवलम्ब्य सङ्क्षिप्तटीका**द्वयं** विरचनीयम्। [2×3]
वार्ता, मात्स्यन्यायः, ब्राह्मणब्रुवः, जाङ्गलदेशः।

9. प्रश्न**द्वयं** समाधेयम्। [2×2]

क) मनुसंहिता केन रचिता ? केन प्रोक्ता ?

ख) केषां सारभूतानंशानाकृष्य नृपस्य सृष्टिः ?

ग) का नाम त्रयी ?

घ) कामज–क्रोधजव्यसनयोः मूलं किम् ?

ङ) दण्डस्य सृष्टिः ब्रह्मणा किमर्थं विहिता ?

10. अनुच्छेद**स्यैकस्य** वङ्गानुवादः कार्यः। [1×10]

क) अद्यतनः हिन्दुधर्मः प्रायशः पौराणिकः, तन्नाम बुद्धस्य अनन्तरकालीनः। एतस्य समर्थनरूपेण स्वामी दयानन्दसरस्वतीवर्यः कञ्चित् अंशं दर्शितवान् अस्ति। होमादिवैदिककर्मणि आहुतिदानसमये पत्न्याः उपस्थितिः अवश्यं भवेत्। किन्तु तया शालिग्रामः, गृहस्य कुलदेवतादयः वा न स्प्रष्टव्याः। यतः सा पूजापद्धतिः पुराणकालात् आगता।

ख) एका एव कल्पना भवतु। सा कल्पना एव भवतां प्राणभूता भवतु। मनसि तामेव चिन्तयन्तु। तदर्थमेव जीवनं भवतु। भवतां मस्तिष्कम्, अस्थिमांसादीनि, नाड्यः, शरीरस्य सर्वे अवयवाः चापि तया कल्पनया एव पूर्णाः भवन्तु। इतराः कल्पनाः पार्श्वे स्थापयन्तु। यशःप्राप्त्यर्थं स्थितः राजमार्गः अयम् एव। आध्यात्मिकविचारवतां महानुभावानां चिन्तनरीतिः एषा एव। इतरे जनाः केवलं शब्दायमानानि यन्त्राणि एव।

———— × ————